# Shri Vishnu Bhujangaprayata Stotra

# શ્રીવિષ્ણુભુજઙ્ગપ્રયાતસ્તોત્રમ્

## Document Information

Text title : Shri Vishnu Bhujangaprayata Stotra

File name : vishnubhujanga.itx

Category : vishhnu, bhujanga, shankarAchArya, vishnu

Location : doc_vishhnu

Author : Adi Shankaracharya

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Translated by : -

Description-comments : Hymn of 8 verses in praise of the Vishnu

Latest update : August 24, 2002, May 15, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2022

*sanskritdocuments.org*

# Shri Vishnu Bhujangaprayata Stotra

# શ્રીવિષ્ણુભુજઙ્ગપ્રયાતસ્તોત્રમ્

ચિદંશં વિભું નિર્મલં નિર્વિકલ્પં
    નિરીહં નિરાકારમોઙ્કારગમ્યમ્ ।
ગુણાતીતમવ્યક્તમેકં તુરીયં
    પરં બ્રહ્મ યં વેદ તસ્મૈ નમસ્તે ॥ ૧॥

વિશુદ્ધં શિવં શાન્તમાદ્યન્તશૂન્યં
    જગજ્જીવનં જ્યોતિરાનન્દરૂપમ્ ।
અદિગ્દેશકાલવ્યવચ્છેદનીયં
    ત્રયી વક્તિ યં વેદ તસ્મૈ નમસ્તે ॥ ૨॥

મહાયોગપીઠે પરિભ્રાજમાને
    ધરણ્યાદિતત્ત્વાત્મકે શક્તિયુક્તે ।
ગુણાહસ્કરે વહ્નિબિમ્બાર્ધમધ્યે
    સમાસીનમોઙ્કુર્ણિકેઽષ્ટાક્ષરાબ્જે ॥ ૩॥

સમાનોદિતાનેકસૂર્યેન્દુકોટિ-
    પ્રભાપૂરતુલ્યદ્યુતિં દુર્નિરીક્ષમ્ ।
ન શીતં ન ચોષ્ણં સુવર્ણાવદાત-
    પ્રસન્નં સદાનન્દસંવિત્સ્વરૂપમ્ ॥ ૪॥

સુનાસાપુટં સુન્દરભ્રૂલલાટં
    કિરીટોચિતાકુઞ્ચિતસ્નિગ્ધકેશમ્ ।
સ્ફુરત્પુણ્ડરીકાભિરામાયતાક્ષં
    સમુત્ફુલ્લરત્નપ્રસૂનાવતંસમ્ ॥ ૫॥

લસત્કુણ્ડલામૃષ્ટગણ્ડસ્થલાન્તં
    જપારાગચોરાધરં ચારુહાસમ્ ।
અલિવ્યાકુલામોલિમન્દારમાલં
    મહોરસ્ફુરત્કૌસ્તુભોદારહારમ્ ॥ ૬॥

સુરત્નાઙ્ગદૈરન્વિતં બાહુદણ્ડૈ-
    શ્ચતુર્ભિશ્ચલત્કઙ્કણાલંકૃતાગ્રૈઃ ।
ઉદારોદરાલંકૃતં પીતવસ્ત્રં
    પદદ્વન્દ્વનિર્ધૂતપદ્માભિરામમ્ ॥ ૭॥

સ્વભક્તેષુ સન્દર્શિતાકારમેવં
    સદા ભાવયન્સંનિરુદ્ધેન્દ્રિયાશ્વઃ ।
દુરાપં નરો યાતિ સંસારપારં
    પરસ્મૈ પરેભ્યોઽપિ તસ્મૈ નમસ્તે ॥ ૮॥

શ્રિયા શાતકુમ્ભદ્યુતિસ્નિગ્ધકાન્ત્યા
    ધરણ્યા ચ દૂર્વાદલશ્યામલાઙ્ગ્યા ।
કલત્રદ્વયેનામુના તોષિતાય
    ત્રિલોકીગૃહસ્થાય વિષ્ણો નમસ્તે ॥ ૯॥

શરીરં કલત્રં સુતં બન્ધુવર્ગં
    વયસ્યં ધનં સદ્મ ભૃત્યં ભુવં ચ ।
સમસ્તં પરિત્યજ્ય હા કષ્ટમેકો
    ગમિષ્યામિ દુઃખેન દૂરં કિલાહમ્ ॥ ૧૦॥

જરેયં પિશાચીવ હા જીવતો મે
    વસામક્તિ રક્તં ચ માંસં બલં ચ ।
અહો દેવ સીદામિ દીનાનુકમ્પિ-
    ન્કિમદ્યાપિ હન્ત ત્વયોદાસિતવ્યમ્ ॥ ૧૧॥

કફવ્યાહતોષ્ણોલ્બણશ્વાસવેગ-
    વ્યથાવિસ્ફુરત્સર્વમર્માસ્થિબન્ધામ્ ।
વિચિન્ત્યાહમન્ત્યામસઙ્ખ્યામવસ્થાં
    બિભેમિ પ્રભો કિં કરોમિ પ્રસીદ ॥ ૧૨॥

લપન્નચ્યુતાનન્ત ગોવિન્દ વિષ્ણો
    મુરારે હરે નાથ નારાયણેતિ ।
યથાનુસ્મરિષ્યામિ ભક્ત્યા ભવન્તં
    તથા મે દયાશીલ દેવ પ્રસીદ ॥ ૧૩॥

ભુજઙ્ગપ્રયાતં પઠેદ્યસ્તુ ભક્ત્યા

સમાધાય ચિત્તે ભવન્તં મુરારે ।
સ મોહં વિહાયાશુ યુષ્મત્પ્રસાદા-
ત્સમાશ્રિત્ય યોગં વ્રજત્યચ્યુતં ત્વામ્ ॥ ૧૪॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છઙ્કરભગવતઃ કૃતૌ
શ્રીવિષ્ણુભુજઙ્ગપ્રયાતસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Sunder Hattangadi

*Shri Vishnu Bhujangaprayata Stotra*

pdf was typeset on May 15, 2022

Please send corrections to *sanskrit@cheerful.com*